Shri Raghunath Temple MSS. Library,
JAMMU

No. ३५२६ ख भाग.

Title तैत्तिरीय संहिता त्रय काण्डस्य ... प्रपाठका:

Author ✗

Extent ७३ Age ✗

Subject संहिता ग्रन्थ:

© Dharmartha Trust JK. Digitized by eGangotri

3424 - II

starting from 18 to 92

55, 59, 84 Missing

F. = 92 - 20 = 72

© Dharmartha Trust JK. Digitized by eGangotri

३४२४ क

२७

तैत्तिरीयसंहिता

द्वितीयकाण्डस्य २-६ प्रपाठकाः

(२: पादारभ्य संपूर्णा)

~~पत्रकं विनष्टम्,~~

११७. ५८. पत्राणि विनष्टानि

© Dharmartha Trust JK. Digitized by eGangotri

T.S. 2,2,1,3

निर्वपेत्संग्रामंजित्वैंद्राग्नीएवस्वेनभागधेयेनोपधावतितावेवास्मिन्निंद्रियं
वीर्यं॥३॥धत्तोनेंद्रियेणवीर्येणव्यृध्यतएषवाएतस्मादिंद्रियंवीर्यंक्रामतिय
एतिजनतामैंद्राग्नमेकादशकपालंनिर्वपेज्जनतामेष्यन्निंद्राग्नीएवस्वेन
भागधेयेनोपधावतितावेवास्मिन्निंद्रियंवीर्यंधत्तःसहेंद्रियेणवीर्येणजनता
॥४ मेतिपौष्णंचरुमनुनिर्वपेत्पूषावाइंद्रियस्यवीर्यस्यानुप्रदातापूषणमेव॥४॥
स्वेनभागधेयेनोपधावतिसएवास्माइंद्रियंवीर्यमनुप्रयच्छतिक्षैत्रपत्यंचरुं
निर्वपेज्जनतामागत्येयंवैक्षेत्रस्यपतिरस्यामेवप्रतितिष्ठत्यैंद्राग्नमेका
दशकपालमुपरिष्टान्निर्वपेदस्यामेवप्रतिष्ठायेंद्रियंवीर्यमुपरिष्टादात्मन्ध
त्ते॥५॥ ॥प्रजाकाममिंद्राग्नीउपप्रयात्यैंद्राग्नमेकादशकपालंनिर्व

© Dharmartha Trust JK. Digitized by eGangotri

18

यँपूषणमेवैकांन चत्वारिंशद्वाज्ञ ॥ १ ॥ अग्नयेपथिकृते पुरोडाशमष्टाकपालं
निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यांवापौर्णमासींवातिपादयेत्पथो
वा एषोध्यपथेनैति योदर्शपूर्णमासयाजी सन्नमावास्यांवापौर्णमासींवा
तिपादयत्यग्निमेव पथिकृतं स्वेन भागधेयेनोपधावति स एवैनमपथात्प
थामपिनयत्यनड्वान्दक्षिणावही ह्येष समृद्ध्या अग्नये व्रतपतये ॥ पुरोडा
शमष्टाकपालं निर्वपेद्य आहिताग्निः सन्नव्रत्यमिव चरेदग्निमेव व्रतपतिं स्वे
नभागधेयेनोपधावति स एवैनं व्रतमालंभयति व्रत्यो भवत्यग्नये रक्षोघ्ने पु १८
श्रीः॥ रोडाशमष्टाकपालं निर्वपेद्यं रक्षांसि सचेरन्नग्निमेव रक्षोहणं स्वे
नभागधेयेनोपधावति स एवास्माद्रक्षांस्यपहंति निशितायां निर्वपेन् ॥ २ ॥

© Dharmartha Trust JK. Digitized by eGangotri

निशितायाꣳहिरक्षाꣳसिप्रेरतꣳसंप्रवृत्तान्येवैनानिहन्तिपरिश्रितेयाजयेद्रक्षसा
मनन्ववचारायरक्षोघ्नीयाज्यानुवाक्येभवतोरक्षसाꣳस्तृत्याअग्नयेरुद्र
वतेपुरोडाशमष्टाकपालंनिर्वपेदभिचरन्नेषावाअस्यघोरातनूर्यद्रुद्रस्त
स्माएवैनमावृश्चतिताजगार्तिमार्छत्यग्नयेसुरभिमतेपुरोडाशमष्टाकपा
लंनिर्वपेद्यस्यगावोवापुरुषावाप्रमीयेरन्योवाबिभीयादेषावाअ
स्यभेषज्यातनूर्यत्सुरभिमतीतयैवास्मैभेषजंकरोतिसुरभिमतेभवतिपू
तीगंधस्यापहत्याअग्नयेक्षामवतेपुरोडाशमष्टाकपालंनिर्वपेत्संग्रा
मेसंयत्तेभागधेयेनैवैनꣳशमयित्वापरानभिनिर्दिशतियमवरेषांवि
ध्यंतिजीवतिसयंपरेषांप्रसमीयतेजयतितꣳसंग्रामं॥४॥अभिवारपर

© Dharmartha Trust JK. Digitized by eGangotri

19

तानुच्यवति येषां पूर्वापरा अन्वंचः प्रमीयंते पुरुषाहुतिर्ह्यस्य प्रियतमाग्न
ये क्षामवते पुरोडाशमष्टाकपालं निर्वपेद्भागधेयेनैवैनं शमयति न
षां पुरायुषोपरः प्रमीयते भि वा एष एतस्य गृहा नुच्यवति यस्य गृहान्द
हत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेद्भागधेयेनैवैनं
शमयति नास्यापरं गृहान्दहति ॥५॥ २॥ व्रतपतये निर्मितायां नि
श्रीः ०१ र्वपेत्पुरुषाः संग्रामं न च त्वारिंश ॥ ७ ॥ ॥ अग्नये कामाय पुरोडाश
मष्टाकपालं निर्वपेद्यं कामो नोपनमेदग्निमेव कामं स्वेन भागधेयेनो १०
पधावति स एवैनं कामेन समर्धयत्युपैनं कामो नमत्यग्नये यविष्ठाय पु
रोडाशमष्टाकपालं निर्वपेत्स्पर्धमानः क्षेत्रे वा सजातेषु वाग्निमेव यवि

© Dharmartha Trust JK. Digitized by eGangotri

ष्ठं स्वेनभागधेयेनोपधावतितेनैवेंद्रियंवीर्यंभ्रातृव्यस्य॥१॥
युवतेविपाप्मनाभ्रातृव्येणाजयतेग्नयेयविष्ठायपुरोडाशमष्टा
कपालंनिर्वपेदभिचर्यमाणोग्निमेवयविष्ठंस्वेनभागधेयेनोपधा
वतिसएवास्माद्रक्षांसियवयतिनैनमभिचरंस्तृणुतेग्नयआ
युष्मतेपुरोडाशमष्टाकपालंनिर्वपेद्यःकामयेतसर्वमायुरियामि
त्यग्निमेवायुष्मंतंस्वेनभागधेयेनोपधावतिसएवास्मिन्नू॥२॥आ
युर्दधातिसर्वमायुरेत्यग्नयेजातवेदसेपुरोडाशमष्टाकपालंनिर्वपे
द्भूतिकामोग्निमेवजातवेदसंस्वेनभागधेयेनोपधावतिसएवैनं
भूतिंगमयतिभवत्यग्नयेरुक्मतेपुरोडाशमष्टाकपालंनिर्वपेद्रुक्का
© Dharmartha Trust JK. Digitized by eGangotri

मोग्निमेवरुक्मंतं स्वेनभागधेयेनोपधावतिसएवास्मिन्रुचंदधाति
रोचतएवाग्नयेतेजस्वतेपुरोडाशं॥३॥ अष्टाकपालंनिर्वपेत्तेजस्कामो
२० ग्निमेवतेजस्वंतं स्वेनभागधेयेनोपधावतिसएवास्मिंतेजआदधाति
तेजस्व्येवभवत्यग्नयेसाहंत्यायपुरोडाशमष्टाकपालंनिर्वपेत्सीक्ष
माणोग्निमेवसाहंत्यं स्वेनभागधेयेनोपधावतितेनैवसहतेयंसी
क्षते॥४॥ भ्रातृव्यस्यास्मिंतेजस्वतेपुरोडाशमष्टाविंशश्च॥ ३ ॥६॥
॥अग्नयेन्नवतेपुरोडाशमष्टाकपालंनिर्वपेद्यःकामयेतान्नवान्स्या
श्री: मित्यग्निमेवान्नवंतं स्वेनभागधेयेनोपधावतिसएवैनमन्नवंतंक २०
रोत्यन्नवानेवभवत्यग्नयेन्नादायपुरोडाशमष्टाकपालंनिर्वपेद्यः
कामयेतान्नादःस्यामित्यग्निमेवान्नादं स्वेनभागधेयेनोपधावति

© Dharmartha Trust JK. Digitized by eGangotri

सरवैनमन्नादं करोत्यंन्नादः ॥ १ ॥ एवन्नवत्यग्नयेन्नपतयपुरोडाश
मष्टाकपालं निर्वपेद्यः कामयेतान्नपतिस्यामित्यग्निमेवान्नपतिं स्व
नभागधेयेनोपधावतिसरवैनमन्नपतिं करोत्यंन्नपतिरेवन्नवत्यग्नयेप
वमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचयेज्या
गामयावीयदग्नये पवमानाय निर्वपति प्राणमेवास्मिं तेन दधाति यदग्
नये ॥ २ ॥ पावकाय वाचमेवास्मिं तेन दधाति यदग्नये शुचय आयुरेवा
स्मिं तेन दधात्युत यदीतासुर्भवति जीवत्येवैतामेव निर्वपेच्चक्षुष्कामो यदग्
नये पवमानाय निर्वपति प्राणमेवास्मिं तेन दधाति यदग्नये पावकाय वाच
मेवास्मिं तेन दधाति यदग्नये शुचये चक्षुरेवास्मिं तेन दधाति ॥ ३ ॥ उत यद्यंधो
भवति प्रैव पश्यत्यग्नये पुत्रवते पुरोडाशमष्टाकपालं निर्वपेदिंद्राय पु

© Dharmartha Trust JK. Digitized by eGangotri

त्रियेपुरोडाशमेकादशकपाले प्रजाकामोग्निरेवास्मै प्रजां प्रजनयति
वृद्धामिंद्रः प्रयच्छत्यग्नये रसवतेऽजक्षीरे चरुं निर्वपेद्यः कामयेत रसवा
न्स्यामित्यग्निमेव रसवंतं स्वेन भागधेयेनोपधावति स एवैनं रसवंतं
21 करोति॥४॥ रसवानेव भवत्यजक्षीरे भवत्याग्नेयी वा एषा यदजा साक्षादे
व रसमवरुंधेग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत व
सुमान्स्यामित्यग्निमेव वसुमंतं स्वेन भागधेयेनोपधावति स एवैनं वसु
श्रीः॥ मंतं करोति वसुमानेव भवत्यग्नये वाजसृते पुरोडाशमष्टाकपालं निर्वपे २१
त्संग्रामे संयत्ते वाजं॥५॥ वा एष सिसीर्षति यः संग्रामं जिगीषत्यग्निः खलु ज ३
वै देवानां वाजसृदग्निमेव वाजसृतं स्वेन भागधेयेनोपधावति धा

© Dharmartha Trust JK. Digitized by eGangotri

वतियाऊटः हंतिवृत्रंजयतितंसंग्राममथोअग्निरिवनप्रतिधृषेनव
त्यग्नयेग्निवतेपुरोडाशमष्टाकपालंनिर्वपेघस्याग्नावग्निमभ्युद्धरे
युर्निर्दिष्टभागोवाएतयोरन्योनिर्दिष्टभागोन्यःस्तौसंभवंतौयजमा
नं॥८॥अग्निसंभवतःसईश्वरआर्त्तिमार्त्तोर्यदग्नयेग्निवतेनिर्वपतिभा
गधेयेनैवैनौशमयतिनार्त्तिमार्च्छतियजमानोग्नयेज्योतिष्मतेपुरोडाश
मष्टाकपालंनिर्वपेघस्याग्निरुद्धृतोहुतेग्निहोत्रउद्वायेदपरआदीप्या
नूद्धृत्यइत्याहुस्तत्तथानकार्यंयद्भागधेयमभिपूर्वमुद्ध्रीयतेकिमपरो
भ्युद्धृ॥९॥क्रियन्तेतितान्येवक्षाणानिसंनिधायमंथेदितःप्रथमंजज्ञे
अग्निःस्वाद्योनेरधिजातवेदाः॥सगायत्रियात्रिष्टुभाजगत्यादेवेभ्योहव्यं

© Dharmartha Trust JK. Digitized by eGangotri

वस्तुप्रजानांनिति छंदांसि वैनऽस्वाधानः प्रजनयत्येषं चाव सास्मिन्निरि
त्यादुर्ज्योतिस्मा अस्य परायन्ति तस्मिन्निति यदग्नये ज्योतिष्मते निर्वपति यदेवा
स्य ज्योतिः परापतितं तेनैवावरुंधे ॥ ॥ करोत्यं भादादधाति यदग्नये प
22 चयेच्चत्सुरेवास्मिंतेन दधाति कनातिवाऽंयऽमान्मुदेवास्य षड्॥ ७ ॥
॥५॥ छ ॥ वैश्वानरं द्वादशकपालं निर्वपेद्वारुणं चरुं दधिक्रावुणे
चरुमभिशस्यमानो यद्वैश्वानरो द्वादशकपालो भवति संवत्सरो वा
श्रीः०\ अग्निर्वैश्वानरः संवत्सरेणैवैनं स्वदयत्यपपापं वर्णं हन्ते वा २२
रुणेनैवैनं वरुणपाशान्मुंचति दधिक्रावुणा पुनाति हिरण्यं दक्षि
णा पवित्रं वै हिरण्यं पुनात्येवैनमाद्यमस्यान्नं भवत्येतामेव निर्व

© Dharmartha Trust JK. Digitized by eGangotri

प्रजाकामः संवत्सरः॥॥ वा एतस्याशांतो योनिं प्रजायै पशूनां
निर्दहति योऽलं प्रजायै सं प्रजां न विंदते यद्वैश्वानरो द्वादशाकपा
लो भवति संवत्सरो वा अग्निर्वैश्वानरः संवत्सरमेव भागधेयेन
शमयति सोऽस्मै शांतः स्वाद्योनेः प्रजां प्रजनयति वारुणेनैवैनं
वरुणपाशान्मुंचति दधिक्राव्णा पुनाति हिरण्यं दक्षिणा पवि
त्रं वै हिरण्यं पुनात्येवैनं॥२॥ विंदते प्रजां वैश्वानरं द्वादशाकपालं
निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति गायत्रियैवैनं ब्रह्मवर्चसे
न पुनाति यन्नवकपालस्त्रिवृतैवास्मिंतेज आदधाति यद्दशाकपा

© Dharmartha Trust JK. Digitized by eGangotri

लो विराडैवास्मिंन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवा
स्मिंन्निंद्रियं दधाति यद्द्वादशकपालो जगत्यैवास्मिंन्पशून्दधाति
२३ यस्मिं जात एतामिष्टिं निर्वपति पूतः ॥३॥ एव तेजस्व्यंन्नाद इंद्रिया क
वी पशुमान्भवत्येव वा एष सुवर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमा
सयाजी संनमावास्यां वा पौर्णमासीं वातिपादयति सुवर्गाय हि
श्रीः॥ लोकाय दर्शपूर्णमासाविज्येते वैश्वानरं द्वादशकपालं निर्वपेद २३
मावास्यां वा पौर्णमासीं वातिपाद्य संवत्सरो वा अग्निर्वैश्वानरः सं
वत्सरमेव प्रीणीत्यथो संवत्सरमेवास्मा उपदधाति सुवर्गस्य लोकस्य
समष्ट्यै ॥४॥ अथो देवता एवान्वारभ्य सुवर्गं लोकमेति । क ३

© Dharmartha Trust JK. Digitized by eGangotri

व१

अथोदेवताएवा[illegible]रास्यसुवर्गंलोकमेति१

वीरहावाएषदेवानांयोग्निमुद्वासयतेनवाएतस्यब्राह्मणाऋतायवःपुरान्नमक्षं
न्नाग्नेयमष्टाकपालंनिर्वपेद्वैश्वानरंद्वादशकपालमग्निमुद्वासयिष्यन्यदष्टा
कपालोभवत्यष्टाक्षरागायत्रीगायत्रोग्निर्यावानेवाग्निस्तस्माआतिथ्यंकरो
त्यथोयथाजनंयतेवसंकरोतितादृगेव॥५॥एवतद्वादशकपालोवैश्वानरोभ
वतिद्वादशमासाःसंवत्सरःसंवत्सरःखलुवाअग्नेर्योनिःस्वामेवैनंयोनिंगम
यत्याद्यमस्यान्नंभवतिवैश्वानरंद्वादशकपालंनिर्वपेन्मारुतंसप्तकपालंग्रा
मकामआहवनीयेवैश्वानरमधिश्रयतिगार्हपत्येमारुतंपापवस्यसस्यवि
धृत्यैद्वादशकपालोवैश्वानरोभवतिद्वादशमासाःसंवत्सरःसंवत्सरेणैवा
स्मैसजातांश्च्यावयतिमारुतोभवति॥६॥मरुतोवैदेवानांविशोदेवविशेनैवास्मै
मनुष्यविशमवरुन्धेसप्तकपालोभवतिसप्तगणावैमरुतोगणशएवास्मै

© Dharmartha Trust JK. Digitized by eGangotri

सजातानवरुंधेन्नस्यमानआसादयतिविश्वामेवास्मा अनुवत्मानंकरोति॥७॥प्रजा
कामःसंवत्सरःपुनात्येवैनंप्रतःसमिद्धयेनाहुआत्तुतान्नवनेकानविंशञ्च॥६॥
॥ि ॥आदित्यंचरुंनिर्वपेत्संग्राममुपप्रयास्यन्नियंवाआदितिरस्यामे
वप्रतिप्रतितिष्ठंतिवैश्वानरंद्वादशकपालंनिर्वपेदायतनंगत्वासंवत्सरोवाअग्निर्वैश्वा
२५ नरःसंवत्सरःखलुवैदेवानामायतनमेतस्माद्वाआयतनाद्देवा असुरानजय
न्यद्वैश्वानरंद्वादशकपालंनिर्वपतिदेवानामेवायतनेयतनतेऽयातेततःसंग्राममे २८
श्रीः तस्मिंन्वाएतौमृज्याते॥९॥योविद्विषाणयोरन्नमत्तिवैश्वानरंद्वादशकपालंनिर्वपे
द्विद्विषाणयोरन्नंजग्ध्वासंवत्सरोवाअग्निर्वैश्वानरःसंवत्सरस्वदितमेवान्निना
स्मिन्मृजातेसंवत्सरायवाएतौसममातेयोःसममानेतयोर्यःपूर्वोभिद्रुह्यतितंवरुणो

© Dharmartha Trust JK. Digitized by eGangotri

गृह्णाति वैश्वानरं द्वादशकपालं निर्वपेत्समानयोः प्रवोऽग्निर्हृद्यं संवत्सरो वा अ
ग्नि वैश्वानरः संवत्सरमेवास्मा निर्वरुणं ॥२॥ पयस्मादग्निर्द्रुह्यति नैनं वरुणो
गृह्णात्याय्यं वारषष्ठ प्रतिगृह्णाति यो वि प्रतिगृह्णाति वैश्वानरं द्वादशकपालं नि
र्वपेद्विं प्रतिगृह्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरस्यादिनामेव प्रतिगृ
ह्णाति नाय्यं प्रतिगृह्णात्यात्मना वारषष्ठा वामा गृह्णाति यद्दुन्नयादन्प्रतिगृह्णाति
कात्यश्वं वा पुरुषं वा वैश्वानरं द्वादशकपालं निर्वपेदुन्नयादन् ॥३॥ प्रतिगृह्य
संवत्सरो वा अग्निर्वैश्वानरः संवत्सरस्यादिनमेव प्रतिगृह्णाति नात्मना मा वामा
गृह्णाति वैश्वानरं द्वादशकपालं निर्वपेत्सनिमेष्यन्संवत्सरो वा अग्निर्वैश्वान
रो यदा खलु वै संवत्सरं जनतायां चरत्यथ स धनार्घो भवति यद्वैश्वानरं द्वा

© Dharmartha Trust JK. Digitized by eGangotri

द्वादशकपालं निर्वपति संवत्सरसंमितामेव सनिमाप्नोत्यच्यवते दानकामा अस्मै प्र
जाः भवंति यो वै संवत्सरं ॥४॥ प्रयुज्य न विमुंचत्यप्रतिष्ठानो वै स भवत्येनमेव वै
श्वानरं पुनरागत्य निर्वपेद्यमेव प्रयुंक्ते तं भागधेयेन विमुंचति प्रतिष्ठित्यै यय
यारज्जोश्च मां गामाजेत्तां भ्रातृव्याय प्रहिणुयां निर्ऋतिमेवास्मै प्रहिणोति ॥५॥
॥ ॥गु आते निर्वरुणं च पंउन्नयादधो वै संवत्सरं षट्त्रिंशद्वाशु ॥६॥ ७॥
श्रौ॰॥ ॥ ऐंद्रं चरुं निर्वपेत्पशुकाम ऐंद्रा वै पशवा विंद्रमेव स्वेन भागधेयेनोपधावति २०
स एवास्मै पशून्प्रयच्छति पशुमानेव भवति चरुर्भवति स्वादेवास्मै योनेः प
शून्प्रजनयतींद्रायेंद्रियावते पुरोडाशमेकादशकपालं निर्वपेत्पशुकाम इं
द्रियं वै पशवा विंद्रमेवेंद्रियावंतं स्वेन भागधेयेनोपधावति स ॥१॥ एवास्मा
स्पर

© Dharmartha Trust JK. Digitized by eGangotri

इंद्रियंपशून्प्रयच्छतिपशुमानेवभवतींद्रायघर्मवतेपुरोडाशमेकादशक
पालंनिर्वपेद्ब्रह्मवर्चसकामोब्रह्मवर्चसंवैघर्मइंद्रमेवघर्मवंतंस्वेनभा
गधेयेनोपधावतिसएवास्मिन्ब्रह्मवर्चसंदधातिब्रह्मवर्चस्येवभवतीं
द्रायार्कवतेपुरोडाशमेकादशकपालंनिर्वपेदन्नकामोर्कोवैदेवानामन्न
मिंद्रमेवार्कवंतंस्वेनभागधेयेन।२।उपधावतिसएवास्मात्रंप्रयच्छ
त्यन्नादएवभवतींद्रायघर्मवतेपुरोडाशमेकादशकपालंनिर्वपेदिंद्रायें
द्रियावतइंद्रायार्कवतेभूतिकामोयदिंद्रायघर्मवतेनिर्वपतिशिरएवास्य
तेनकरोतियदिंद्रायेंद्रियावतआत्मानमेवास्यतेनकरोतियदिंद्रायार्कव
तेभूतएवान्नाद्येप्रतितिष्ठतिभवत्येवेंद्राय।३।अंहोमुचेपुरोडाशमेकाद

© Dharmartha Trust JK. Digitized by eGangotri

द्शाकपालं निर्वपेद्यः पाप्मना गृहीतस्यात्पाप्मा वा एतं गृह्णाति यदंह इंद्रमेवांहोमुच
दं स्वेन भागधेयेनोपधावति स एवैनं पाप्मनो अंहसो मुंचतींद्राय वैमृधा
य पुरोडाशमेकादशाकपालं निर्वपेद्यं मृधोभि प्रवेपेरन्राष्ट्राणि वा
भि समीयुरिंद्रमेव वैमृधं दं स्वेन भागधेयेनोपधावति स एवास्मा
न्मृधः ।५। अपहंतींद्राय त्रात्रे पुरोडाशमेकादशाकपालं निर्वपेद्बद्धो वा
परियत्तो वेंद्रमेव त्रातारं दं स्वेन भागधेयेनोपधावति स एवैनं त्रायत
श्रीः इंद्रायार्काश्वमेधवते पुरोडाशमेकादशाकपालं निर्वपेद्यं महायज्ञो नो २८
पनमेदेते वै महायज्ञस्यांत्ये तन्वौ यदर्काश्वमेधाविंद्रमेवार्काश्वमेधवतं दं
स्वेन भागधेयेनोपधावति स एवास्मा अंततो महायज्ञं च्यावयत्युपैनं म

© Dharmartha Trust JK. Digitized by eGangotri

ह्वायज्ञानमति॥५॥ ॥इंद्रियावंतवस्यन न्नागधेयेयनोपधावतिसोके
वंतंᳲस्वेनभागधेयेनैवेंद्रायास्मान्मृधोस्मैसप्तच॥८॥छ॥
॥ ॥इंद्रायान्हैडावसुराहाद्यामकादशाकपालंनिर्वपेद्ग्रामकामइंद्र
मेवान्वैड्रुᳲस्वेनभागधेयेनोपधावतिसएवास्मैसजातानुकान्क
रोतिग्राम्येवभवतींद्राण्येचरुंनिर्वपेघस्यसेनास्यᳲश्रितवस्याइंद्रा
णीवैसेनायेदेवतेंद्राणीमेवस्वेनभागधेयेनोपधावतिसेवास्यसेनाᳲ
सᳲस्पतिबल्बजानधि॥१॥ इध्मसन्नह्येयजोर्यत्राधिघ्नन्नान्यमरुद्गता
बल्बजाउदतिष्ठन्नुगावामेवेनंन्यायमपिनीयगावदयतींद्रायमन्युमतेम
नस्वेतपुरोडाशमेकादशकपालंनिर्वपेत्संग्रामेसंयत्तइंद्रियेणवैमन्यु
नामनसासंग्राममजयतींद्रमेवमन्युमंतमनस्वंतंᳲस्वेनभागधेयेनोपधाव

© Dharmartha Trust JK. Digitized by eGangotri

इक्स्यादेतानि हिवा एतस्मादपक्रोतान्यथैष हतमना नास्वयंपाप २

तिस एवास्मिंन्निड्रियमन्युमनो दधातिज यतितं॥२॥ स्संग्रामममेतामेवनि
वपघाद्धतमनास्वयंपापइंड्रमेवमन्युमंतंमनस्वतं हं स्वेनभागधेयेनो
पधावति स एवास्मिन्निंड्रियं मन्युमनो दधातिनहतमनास्वयंपापा नयती
ड्रायदात्रे पुरोडाशमेकादशकपालंनिर्वपेद्यः कामयेत दानकामामेप्र
जास्युः॥३॥इंद्रंमेवदातारं हं स्वेनभागधेयेनोपधावतिसएवास्मैदान
कामाः प्रजाः करोति दानकामाअस्मैप्रजा भवंतीड्रायप्रदात्रे पुरोडाश
मेकादशकपालं निर्वपेद्यस्मै प्रत्तमिवसंन्नप्रदीयतेंड्रमेवप्रदातारं हं
श्री॥ स्वेनभागधेयेनोपधावतिस एवास्मै प्रत्तमिवसंन्नप्रदीयतेंड्रमेवप्र २७
दातारंह दापयतींड्रायसुत्राम्णे पुरोडाशमेकादशकपालं निर्वपेद
परुद्धोवा॥४॥अपरुध्यमानो वेंड्रमेवसुत्रामाणं हं स्वेनभागधेयेनो

© Dharmartha Trust JK. Digitized by eGangotri

श्री श्रीगणेशाय नमः ५ श्रीगणेशाय नमः ॥ ॐ

पधावति स एवैनं त्रायते न परुष्यो नवतीन्द्रो वै सदृङ् देवताभिरासीत्स न
व्यावृतमगच्छत्स प्रजापतिमुपाधावत्तस्मा एतमैन्द्रमेकादशाकपालं नि
र वपत्तेनैवास्मिन्निन्द्रियमदधाच्छक्करी याज्यानुवाक्ये अकरोद्वज्रो वै शा
करी स एनं वज्रो भूत्या ऐंध ॥५॥ सोऽम वज्रो बिभेद् भूतः प्र मा धक्ष्यतीति
स प्रजापतिं पुनरुपाधावत्स प्रजापतिः शाक्कर्या अधि रेवतीं निरमिमी
त शान्त्या अप्रदाहाय योऽलं श्रियै सन्त्सदृङ् समानैः स्यात्तस्मा एतमै
न्द्रमेकादशाकपालं निर्वपेदिन्द्रमेव स्वेन भागधेयेनोपधावति स एवा
स्मिन्निन्द्रियं दधाति रेवती पुरोनुवाक्या भवति शान्त्या अप्रदाहाय शाक्व
री याज्या वज्रो वै शाक्करी स एवैनं वज्रो भूत्या इन्धे भवत्येव ॥६॥

सोऽम वज्रो बिभेद् भूतः प्र मा धक्ष्यप ॥

© Dharmartha Trust JK. Digitized by eGangotri

सरस्वत्याज्यभागा भवति वाग्वै सरस्वती वाचैवैनमभिचरति ४

28

॥ अपि तद्दृ स्रुवैर्घ भवति चतुर्दशाचा ॥ छा ॥ ७ ॥ आग्नावैष्णवमेकादशकपा
लं निर्वपेदभिचरन्त्सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदाग्नावैष्ण
व एकादशकपालो भवत्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञे
न चाभिचरति बार्हस्पत्यश्चरुर्भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणै
वैनमभिचरति ॥ ८ ॥ प्रति वै परस्तादभिचरन्तमभिचरन्ति द्वेद्वे पुरोनुवा
क्ये कुर्यादति प्रयुक्त्या एतयैव यजेताभिचर्यमाणो देवताभिरेव देवताः प्रति २८
श्रीः ॥ चरति यज्ञेन यज्ञं वाचा वाचं ब्रह्मणा ब्रह्म स देवताश्चैव यज्ञं च मध्यतो व्य
वसर्पति तस्य न कुतश्चनोपाव्याधो भवति नैनमभिचरन्स्तृणुत आग्ना
वैष्णवमेकादशकपालं नोपाव्याधो भवति नैनमभिचरन्स्तृणुत आग्ना

कु ८

© Dharmartha Trust JK. Digitized by eGangotri

वैष्णवमेकादशकपालंनिर्वपेद्यंयज्ञोन ॥२॥ उपनमेदग्निःसर्वादेवतावि
ष्णुर्यज्ञोग्निंचैवविष्णुंचस्वेनभागधेयेनोपधावतितावेवास्मैयज्ञंप्रयच्छतउ
पैनंयज्ञोनमत्याग्नावैष्णवंघृतेचरुंनिर्वपेच्चक्षुष्कामोग्नेर्वैचक्षुषामनु
ष्याविपश्यंतियज्ञस्यदेवाअग्निंचैवविष्णुंचस्वेनभागधेयेनोपधावति
तावेव ॥३॥ अस्मिंचक्षुर्धत्तश्चक्षुष्मानेवभवतिधेन्वैवाएतद्रेतोयदाज्य
मनडुहस्तंडुलामिथुनादेवास्मैचक्षुःप्रजनयतिघृतेभवतितेजोवैघृतं
तेजश्चक्षुस्तेजसैवास्मैतेजश्चक्षुरवरुंधइंद्रियंवैवीर्यंवृंक्तेभ्रातृव्योयज
मानोयजमानस्याध्वरकल्पांप्रतिनिर्वपेद्भ्रातृव्येयजमानेनास्येंद्रियं ॥४॥
वीर्यंवृंक्तेपुरावाचःप्रवदितोर्निर्वपेद्यावत्येववाक्तामप्रोदितांभ्रातृव्यस्य

© Dharmartha Trust JK. Digitized by eGangotri

द्रंङ्गनामस्य वाचं प्रवदंतीमन्या वाचोऽनुप्रवदंतीति तादिंद्रियं वीर्यं यजमाने
दधत्याग्नावैष्णवमष्टाकपालं निर्वपेत्प्रातःसवनस्याकाले सरस्वत्याज्य
भागास्याद्बार्हस्पत्यश्चरुर्यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रं
29 प्रातःसवनं प्रातःसवनमेव तेनाप्नोति ॥५॥ आग्नावैष्णवमेकादशाकपालं
निर्वपेन्माध्यंदिनस्य सवनस्याकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्य
श्चरुर्यदेकादशाकपालो भवत्येकादशाक्षरा त्रिष्टुप् त्रैष्टुभं माध्यंदिनं २९
श्रीः॥ सवनं माध्यंदिनमेव सवनं तेनाप्नोत्याग्नावैष्णवं द्वादशाकपालं निर्वपे
त्तृतीयसवनस्याकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यद्द्वादशा
कपालो भवति द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवनमे
व तेनाप्नोति देवताभिरेव देवताः ॥६॥ उत्तिष्ठ रति यज्ञेन यज्ञं वाचा वाचं

© Dharmartha Trust JK. Digitized by eGangotri

ग्नणाव्रसकपालेनवछंदांद्दःस्याग्नातिधुनोङाश्नेसवनानिमैत्रावरुण
निर मेककपालं॥ वैपद्वरगायैकालयैवासोभ्रातृव्यस्यवन्नात्तुबध्यासारचे
षतस्यैककपालोन्नवतिनाहिकपालैःपशुमर्हत्यांहुं॥७॥ ॥६॥ब्रह्म
णोवनमन्निचरतियझानुतावैवास्यैंडियमाश्नातिदेवताःसप्तत्रिंशश्च॥ ॥८॥
असावादित्योनव्यरोचततस्मैदेवाःप्रायश्चित्तिमैछंतस्मारततःसोमारौ
द्रंचरुंनिरवपंतेनैवास्मिन्रुचमदधुर्योब्रह्मवर्चसकामःस्यात्तस्मारत
त्सोमारौद्रंचरुंनिर्वपेत्सोमंचैवरुद्रंचस्वेनभागधेयेनोपधावतिता
चवास्मिन्ब्रह्मवर्चसंधत्तोब्रह्मवर्चस्येवभवतितिष्याहूर्णमासेनिर्वपेद्रु
द्रःश्वैतिष्यःसोमःपूर्णमासःसाक्षादेवब्रह्मवर्चसमवरुंधेपरिश्रितेयाजये

© Dharmartha Trust JK. Digitized by eGangotri

तिब्रह्मवर्चसस्यपरिगृहीत्यैसोम्यं देवतायै श्यामाकं चरुं निर्वपेत् वत्सायैदुग्धं मथितेनमाज्यं तत्र
ब्राह्मणमाज्येनमार्ष्टियन्तेयावद्देवब्रह्मवर्चसंतत्सर्वंकरोत्यतिब्रह्मवर्चसंक्रियते
तदृत्याहुरीश्वरोदुश्चर्मा भवितोरितिमानवीऋचौधाय्येकुर्याद्यद्वैकिंचमनुरव
वदत्तद्भेषजं॥२१॥नचदुश्चर्माभवतिसोमापौष्णं
चरुंनिर्वपेत्सोम्यावैदेवतयापुरुषःपौष्णाःपशवःस्वयैवास्मैदेवतया
पुरुषःपौष्णाःपशवःस्वयैवास्मैदेवतयापशुभिस्त्वचंकरोतिनदुश्चर्माभवति
सोमारौद्रंचरुंनिर्वपेत्प्रजाकामःसोमोवैरेतोधाअग्निःप्रजानांप्रजनयिता
सोमएवास्मैरेतोदधात्यग्निःप्रजांप्रजनयतिविन्दते॥२२॥प्रजांसोमारौद्रं 30
चरुंनिर्वपेदभिचरन्सोम्यावैदेवतयापुरुषएषरुद्रोयदग्निःस्वायाएवैनंदेव
तायैनिष्क्रीयरुद्रायापिदधातिताजगार्तिमार्च्छतिसोमारौद्रंचरुंनिर्वपेज्ज्योगा

© Dharmartha Trust JK. Digitized by eGangotri

मयावीसोमंवाएतस्यसोमागच्छत्यग्नेःशारीरंयस्यज्योगामयतिसोमादे
वास्यसोमंनिष्क्रीणात्यग्नेःशरीरंसूनयदि॥४॥इतासुर्भवतिजीवत्येवसोमा
रुद्रयोर्वाएतंग्रसितंहोतानिष्खिदतिसईश्वरआर्तिमार्तोरनड्वान्होत्रा
देयोवह्निर्वाअनड्वान्वह्निर्होतावह्निनैववह्निमात्मनःस्पृणोतिसोमारौ
द्रंचरुंनिर्वपेद्यःकामयेतस्वेस्माआयतनेभ्रातृव्यंजनयेयमितिवेदिंप
रिगृह्यार्धमुद्धन्यादर्धंनार्धंबर्हिषस्तृणीयादर्धंनार्धमिध्मस्याभ्या
दध्यादर्धंनस्वएवास्माआयतनेभ्रातृव्यंजनयति॥५॥ ॥तुद्रानेषडं
विंदतयदिस्तृणीयादर्धद्वादशाच॥७॥५०॥ ॥ऐन्द्रमेकादशकपा
लंनिर्वपेन्मारुतंसप्तकपालंग्रामकामइन्द्रंचैवमरुतश्चस्वेनभागधेये
नोपधावतितएवास्मैसजातान्प्रयच्छन्तिग्राम्येवभवत्याहवनीयऐन्द्रमधि

© Dharmartha Trust JK. Digitized by eGangotri

श्रपति गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै सप्तकपालो मारुतो भवति
सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुंधे नूयमान आसादयति
31 विशमेव ॥१॥ अस्मा अनुवर्त्मानं करोत्येतामेव निर्वपेद्यः कामयेत क्षत्राय
च विशे च समदं दध्यामित्यैंद्रस्यावद्यन्ब्रूयादिंद्रायानुब्रूहीत्याश्राव्य
ब्रूयान्मरुतो यजेति मारुतस्यावद्यन्ब्रूयान्मरुद्भ्योनुब्रूहीत्याश्राव्य ब्रू
यादिंद्रं यजेति स्व एवेभ्यो भागधेये समदं दधाति वितृंढाणास्तिष्ठंत्येतामे तिष्ठ
वा॥२॥ निर्वपेद्यः कामयेत कल्पेरन्निति यथादेवतमेव दायय यथादेवतं यज
श्रीः ३१ ति भागधेयेनैवैनान्यथायथं कल्पयति कल्पंत एवैंद्रमेकादशकपालं निर्वपे
द्वैश्वदेवं द्वादशकपालं ग्रामकाम इंद्रं चैव विश्वांश्च देवान्त्स्वेन भागधेये
नोपधावति त एवास्मै सजातान्प्रयच्छंति ग्राम्येव भवत्यैंद्रस्यावदायवैश्व

© Dharmartha Trust JK. Digitized by eGangotri

देवस्यावघेदर्यैडस्य॥३॥उपरिष्टाद्धिंडियेणैवास्मातन्न यतः सजातान्य
पिगत्मा सुपाधायत्सर्वयंवासोद्वाक्षिणासजातानामुपादिस्येप्राश्नि येडुग्ध
प्रयंगवंच्चमुन्लेवे पन्मरुझ्यायाम कामः प्राश्निये वपयसा मे रूताजाताःप्र
श्नियेप्रियंगवामारुतानाश्नियेप्रियंगवामारुतान्खलुवैदेवतयास
तो५ जामरुतरवस्चनभागधेयेनोपधावतितरवास्मैसजातान्प्रयच्छंतिया
म्यवन्नवतिप्रियवतीयाज्यानुवाक्याभ्रवतिःद्विपदरवावरुंधेचतुष्पदा
याज्याचतुष्पदएवपश्चनवरुंधेदेवासुरासंयत्ताआसंतेदेवामिथाविप्र
प्रियआसंतेरन्यान्यस्मैज्येष्ठायातिष्ठमानाश्चतुर्धाव्यक्रामंन्नग्निर्वै
स्कुभिःसोमारुद्वैरिंद्रोमरुद्भिर्वरुणआदित्यैःसइंद्रःप्रजापतिमुपाधावत्तं
॥५॥एतयासंज्ञान्यायाजयदग्नयेवसुमतेपुरोडाशमष्टाकपालंनिरव
प्रियमेवेनंसमानानांकरोतिद्विपदापु
रोनुवाक्याभवे

© Dharmartha Trust JK. Digitized by eGangotri

पत्नीमाय रुद्रवते चरुमिंद्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणा
३२ यादित्यवते च चरुं तनावाहेंद्रवाज्यैष्ठ्यायाग्निसमज्ञा नतयः समानेन मि
त्राविप्रियस्याग्नमतयासंज्ञान्यायाज्यद यद्यवसुमते पुरोडाशमष्टा
कपालं निर्वपेत्सोमाय रुद्रवते चरुमिंद्राय मरुत्वते पुरोडाशमेकादश
कपालं वरुणायादित्यवते च चरुमिंद्रमेवनं धत्तं ज्यैष्ठ्याय समानाग्निसं
ज्ञानं तं वसिष्ठः समानानां नवाति ॥६॥ ॥ विशामेवतिष्ठंत्यनामेवाथै
श्रीः॥ ड स्य याज्यानुवाक्यं तं रुणाय चतुर्दशो च ॥११॥ ॥७॥ हिरण्यगर्भ ३२
आपाद्यग्रजापते । स वेद पुत्रः पितरं स मातरं स सूनुर्भुवत्स भुव त्पुन
र्मघः । स द्यामौर्णोदंतरिक्षं स स्वः स विश्वा भुवो अभवत्स आभवत् । उद्
त्यं चित्रं । स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता । बृहत्ततंथ भानुना । निका

© Dharmartha Trust JK. Digitized by eGangotri

व्यावेधसः शश्वतस्कर्हस्ते दधानः ॥१॥ नर्यो पुरूणि ॥ अग्निर्देवड्डीयिपतीर
यीणा ०८ः सचाचक्राणा ॥ अमृतानि विश्वा ॥ हिरण्यपाणिमूतये सवितारमु
पह्वये ॥ सचेतादेवतापदं ॥ वाममद्यसवितर्वाममुश्वोदिवेदिवेवाममम
स्मभ्यं ८ः सावीः ॥ वामस्यहिक्षयस्यदेव ॥ भूरेरयाधिया ॥ वामभाजस्याम ।
बडिस्यापर्वतानां ॥ विदं बिन्नर्बिष्टाथिवि ॥ प्रयाधियावामभाजस्याम ॥ हमिप्र
वत्सतिमङ्कोडिनोषि ॥ २ ॥ मदिनि ॥ स्तोमासस्त्वाविचारिणिप्रतिष्टोभन्यकुभिः ॥
प्रयावाजन्नहुषंतंपतुमस्यस्यहेतुनि ॥ रुहदेरणासरव्यासचयर्यामानदि
ष्यहूर्यश्चपीनः ॥ अ[illegible]यः सामोन्यधाप्यस्मेतस्माइडं प्रतिरमम्यद्ध ॥ आ
पांतमन्युस्तृपलप्रभर्मीधुनिः शिमीवाच्छरुमाटं ऋजीषी ॥ सोमाविश्वा

© Dharmartha Trust JK. Digitized by eGangotri

३३

न्यन्साधनानिनावोगिंड्डं प्रतिमा ना नि दे भ्रुः प्र ।।३।। सुवानःसोम अत युथिकेनं इ
य ब्रह्मजा मदगितिर्चन्नु । वृषायना सिश्राव सस्तु नस्यां तर्यंछ गय्वा नेध ग्रं हृढः दास
नाथस्तोमदं च सु भ्यं च ब्रह्मनन रा ब्रह्मकृतः सपर्यन्नु । अर्को वायन्नु रतेसोमच
हो स्तत्र दिं डा दधते प्रकु नुयीं । वषड् विश्ववास आंकुणा मितन्मेडु मस्य चन्ति पि
विष्ट हव्यं ।।४।। वर्धं तु लासुष्टुतयागि रामधुर्य पातस्यक्षितिः सदानः ।। प्रत न्न
अघ स्ति पि विष्ट नामा ये शाटः सा मिव पुनानि विद्वान्नु । तं वाग्यामिनव सर्मे वि
न५
यानु स यंतम स्पर ङसः परा के ।। के मित्र विश्लाप रि चर्य यंस्त्र यप हव दस्या नि
श्री:\ पि विष्ट्वा अस्मि मा वयो अस्मद पग रहरत घदन्यरु प समिथ्ये वोक्षं थ ।।५।। अग्न ३३
दा दा शुषे रयिं वी रवं तं पती यसं । शिशीहि नः सूनु मतः । दानो अग्ने बृति ना वा:
सहस्त्रिणा दुरानु वाजः ८ श्रु त्या अपा वृधि । प्राची द्यावा पृथिवी ब्रह्मणा कृधि

© Dharmartha Trust JK. Digitized by eGangotri

सुवर्णांशुक्रमुषसो विदिद्युतुः। अग्निर्द्धोद्रविणंवीरपेशा। अग्निरॄषिंयःसह
स्रासनोति। अग्निर्द्दिविहव्यमाततानाग्नेर्धामानिविभृतापुरुत्रामा॥५॥ नोने
र्धीभालक्रयोनुघृतंनहूतंनेस्वयपाः शुचिहिरण्यं। नतेनुकेतानतोचतस्वयावः।
तनेसुश्वेंड्रुसार्पिषादवोक्षीधीषआस्तनि। उतानवसुभूर्यानुक्थेसुशावस
स्यतदूषटःस्तोतृभ्यआन्नरा॥ वायोयातटःद्दुरीणांसुवस्वपोथ्याणां। उतवानेस
हस्विणोरथंआयातुपाजसा। ध्रूयाग्निः॥७॥ यास्तिदाश्वाटःसमछाणियुङ्क्ष्य
वोयविष्ठयेडुयोणे। निनोयटःसुभोजसंसुवेदनिवीयवहव्यमभ्रियंदराध्यः
येवतीर्नःस्वधमादङ्डंस्तंतुविवाजाःहुमंतोयान्निर्मेदेम। येवाटःडंडुवतस्त
पि ३ नास्याबाबतामघोनः। श्रेडुहविवःसुनस्य॥८॥ ॥दधानोजिंनापिदेरुःश्रह

© Dharmartha Trust JK. Digitized by eGangotri

यंनभ्रयमायाति: श्चत्वारिंशाद्यः ॥४२॥ ॥छ॥ ॥छ॥

॥ ॥प्रजापतिस्तास्त्वष्टाऽग्नये पथिकृते न्यग्रेकामायाग्नये पन्नवते वैश्वा
नरयादित्यं चरुं मैंद्रं चरुं मिंद्रायान्वृजव आग्नावैष्णवमसौ सोमारौद्रं मैं
द्रमेकादशकपालं हिरण्यगर्भो द्वादश ॥ ॥प्रजापतिरग्नये कामायाग्नि
संनवनायो विद्विषाणायो गिंधमस नच्येद्याग्नावैष्णवं परिष्ठाघासिद्याश्वा
दः समेदकस्मात: ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥ ॥ॐ हरि: ॐ आदित्येभ्यो भुवद्वद्भ्यः चरुं निर्वपेद्भूतिकाम आदि
त्या वा एतं भूत्यै प्रतिनुदंते यो लं भूत्यै सन्न भूतिं न प्राप्नोत्यादित्यानेव भुवद्वत:
स्वेन भागधेयेनोपधावति त एवैनं भूतिं गमयंति भवत्येवादित्येभ्यो धारयद्

© Dharmartha Trust JK. Digitized by eGangotri

ध्यः स्यत्तं निर्वपेदपरुद्धो वाप रुध्यमानो वादित्या वा आपरोद्धार आदित्या
अवगमयितार आदित्यानेव धारयद्भूतः॥१॥ स्वेन भागधेयेनोपधावतित
एवैनं विमिदा घ्रत्यन परुध्यो नवत्य दितेनुमन्यस्वेत्य परुध्यमानोस्यपद
मादहीत यंवा अदितिर्नियमवास्मै राज्यमनुमन्यते सत्याशीरित्याहसत्या
मेवाशिषंकुरुत इह मन इत्याह प्रजा एवास्मै समनसः करोत्युप प्रेत मरु
तः॥२॥ सुदानव एनाविन्द्रयति नाम्नः मुं याजानमित्याह मारुतीवै विड्ज्ये
ष्ठा विन्द्रयति विशैवैनं राष्ट्रेण समर्धयति यः परस्तात् ग्राम्यवादी स्यात्तस्य
गृहाद्व्रीहीनाहरेच्छुक्लांश्च कृष्णांश्च विचिनुयाद्ये शुक्लाः स्युस्तमादित्यं च
रुं निर्वपेदादित्या वै देवतया विड्विशमेवावगच्छति॥३॥ अवगतास्य वि डन
वगतं राष्ट्रमित्याहुर्ये कृष्णाः स्युस्तं वारुणं चरुं निर्वपेद्वारुणं वै राष्ट्रमुभे एव

© Dharmartha Trust JK. Digitized by eGangotri

विशं वा राष्ट्रं वावगच्छति यदि नावगच्छेदिममहमादित्येभ्यो भागं निर्वपाम्यामु
ष्मादमुष्यै विशोऽवगंतोरिति निर्वपेदादित्या एवैनं भागधेयं प्रेप्सन्तो विशमव
।।४।। गमयंति यदि नावगच्छेदाश्वत्थान्मयूखान्त्सप्त मध्यमेषायामुपहन्या
दिदमहमादित्यान्बध्नाम्यामुष्मादमुष्यै विशोऽवगंतोरित्यादित्या एवै
नं बद्धवीरा विशमवगमयंति यदि नावगच्छेदेतमेवादित्यं चरुं निर्वपेदि
ध्मेऽपि मयूखान्त्संनह्येदनपरुध्यमेवावगच्छत्याश्वत्था भवंति मरुतां वा
एतदोजो यदश्वत्थ ओजसैव विशमवगच्छति सप्त भवंति सप्त गणा वै मरुतो
श्रीः ।। गणश एव विशमवगच्छति ।।५।। धारयद्धलो मरुतो गच्छति विशमेवैतद्दृढाद
यान्च ।।७।।१।। देवा वै मृत्योर्बिभ्यतः प्रजापतिमुपाधावन्तेभ्य एतां प्रजापत्यां
शतकृष्णलां निरवपन्तयैवैभ्यो मृत्युमदधाद्यो मृत्योर्बिभीयात्तस्मा एतां प्राजा

© Dharmartha Trust JK. Digitized by eGangotri

पत्याऽशतकृस्नलांनिर्वपेत्प्रजापतिमेवस्वेनभागधेयेनोपधावैसएवास्मिंन्ना
युर्द्धातिसर्वमायुरेतिशतकृस्नला भवतिशतायुः पुरुषः शतेंद्रियआयुष्येवें
द्रियाप्रतितिष्ठतिघृतेभवत्यायुर्वैघृतममृतꣳहिरण्यमायुष्येवास्माऽअमृते
चत्वारिं४ नसमीचीधातिचत्वारिꣳकृस्नलान्यवद्यातिचतुष्पवस्यान्यास्कधाब्रह्मणस्
पतयेचरुंचेवयजमानमायुर्दधात्यसावादित्योनव्यरोचततस्मैदेवाः प्रायः
श्चित्तिमैछंस्तस्माएतꣳसौर्यंचरुंनिरवपंस्तेनैवास्मिन्रुचमदधुर्योब्रह्म
वर्चसकामस्यात्तस्माएतꣳसौर्यंचरुंनिर्वपेदमुमेवादित्यꣳस्वेनभागधेये
नोपधावतिसएवास्मिन्ब्रह्मवर्चसंदधातिब्रह्मवर्चस्व्येवभवत्युभयतोरुक्मौ
भवत्युभयतएवास्मिन्रुचंदधातिप्रयाजेप्रयाजेकृस्नलंजुहोतिदिग्भ्यए
वास्मैब्रह्मवर्चसमवरुंधआग्नेयमष्टाकपालंनिर्वपेत्सावित्रंद्वादशकपा

© Dharmartha Trust JK. Digitized by eGangotri

ले

विंदेय हिरण्यंमोपनमेदितियदाग्नेयो भवत्याग्नेयंवैहि . स्यैवहिरण्यं१

त्वंभ्रम्य॥३॥चतुर्थः कामयेत हिरण्यंतेनैवनाहिंदतेसावित्रोन्चवेतिसवि
तृप्रसूतएवैनहिंदताेरम्यैचतुनेवत्यस्यामेवनहिंततपेन८हिरण्यंनम
तिविबारएषद्दुंद्रियेणावीर्येणार्ध्यतेयोहिरण्यंविंदतएतौं॥४॥एतमिर्वपहिर
36 ण्यंवित्वानेंद्रियेणावीर्येणव्यृर्ध्यतएतामेवनिर्वपेद्यस्यहिरण्यंनश्येद्यदा
ग्नेयोभवत्याग्नेयंवैहिरण्यंयस्यैवहिरण्यंतेनैवैनद्विंदतिसावित्रोभवतिस
वितृप्रसूतएवैनद्विंदतिरम्यैचतुभवत्यस्यांवाएतन्नश्यतियन्नश्यत्यस्या
श्रीः मेवैनद्विंदतींद्रा॥५॥चतुःसोममभीषद्रापिबत्सविष्वंङ्ख्यार्छत्सइंद्रियेणा ३६
सोमपीथेनव्यार्ध्यतसयद्धेद्दुदवमीत्तश्यामाकाअजायंतसप्रजापति
मुपाधावत्तस्मा एतंसोमेंद्रंश्यामाकंचरुन्निरवपत्तेनैवास्मिन्निंद्रि

© Dharmartha Trust JK. Digitized by eGangotri

सोमपीथमद्याद्द्विवा एष इंद्रियेण सोमपीथेन व्यृध्यते यः सोमं वमिति यः सो
मवामी स्यात्तस्मै ॥ ६ ॥ एतं सोमेंद्रं श्यामाकं चरुन्निर्वपेत् सोमं चैवेंद्रं च
स्वेन भागधेयेनोपधावति तावेवास्मिन्निंद्रियं सोमपीथं धत्तो नेंद्रियेण सो न्नि ३
मपीथेन व्यृध्यते यत्सोम्यो भवति सोमपीथमेवावरुन्धे यदैंद्रो भवतींद्रिय
वे सोमपीथ इंद्रियं चैवैनं वा सोमपीथमवरुन्धे श्यामाको भवत्येष वाव स सोमः
॥ ७ ॥ साक्षादेव सोमपीथमवरुन्धे ग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिं
द्राय प्रदात्रे पुरोडाशमेकादशकपालं पशुकामोऽग्निरेवास्मै पशून्प्र
जनयति वृद्धानिंद्रः प्रयच्छति दधि मधु घृतमापो धाना भवन्त्येतद्वै पशूना
ं रूपं रूपेणैव पशूनवरुन्धे पंचगृहीतं भवति पांक्ता हि पशवो बहुरूपं

© Dharmartha Trust JK. Digitized by eGangotri

37 नवतिबहुरूपाहियशवः॥ ॥संमृध्यैप्राजापत्यंनवतिप्राजापत्यावैपशवः
प्रजापतिरेवास्मैपशून्प्रजनयत्यात्मावैपुरुषस्यमधुयन्मध्वग्नौजुहो
त्यात्मानमेवतद्यजमानोग्नौप्रदधातिपंक्त्यौयाज्यानुवाक्येभवतःपांक्तःपु
रुषःपांक्ताःपशवआत्मानमेवनिस्पृत्यानिष्क्रीयपशूनवरुंधे॥५॥ ॥७॥ ॥
॥इंद्रियोस्मिन्नरम्याऽरतामिंद्रस्यात्तस्मैसोमाबहुरूपादिपशावएकचत्वारि
टःराझा॥२॥देवावैसत्रमासततेहिंपरिमितंयशस्कामास्तेषांसोमंराजानं ३७
श्री।४। यशआर्छत्सगिरिमुदैत्तमग्निरनूदैत्तावग्नीषोमौसमभवतांतावींद्रोयज्ञ
विभ्रष्टोनुपरैत्तावब्रवीद्याजयतंमेतितस्मा एतामिष्टिंनिरवपतामाग्नेय
मष्टाकपालमैंद्रमेकादशकपालंःसौम्यंचरुंतयैवास्मिंस्तेजः॥१॥इंद्रियं

© Dharmartha Trust JK. Digitized by eGangotri

तेनाग्नेयस्य च सौम्यस्य चैंद्रे समाश्लेषये तेज श्चैवास्मिन्ब्रह्मवर्चसं ४

ब्रह्मवर्चसमथर्वणो या यज्ञाविभ्रष्टस्यान्नस्मारतामिष्टिं निर्वपेदाग्नेयमष्टा
कपालमैंद्रमेकादशाकपालं ८ सोम्यं चरुं यदाग्नेयो भवति तेजएवास्मिं
तेन दधाति यदैंद्रो भवतीन्द्रियमेवास्मिं तेन दधाति यत्सोम्यो ब्रह्मव
र्चसं तेन दधाति यदैंद्रो भवतीन्द्रियमेवास्मिं तेन दधाति यत्सोम्यो ब्रह्मव
र्चसं चसमीचीनाः दधात्यग्नीषोमीयमेकादशाकपालं निर्वपेद्यं का
मा नापनमेदाग्नेयो वै ब्राह्मणः स सोमं पिबति स्वामेव देवताः स्वेन भा
गधेयेनोपधावति सैवैनं कामेन समर्धयत्युप नं कामो नमत्यग्नीषोम
यमष्टाकपालं निर्वपेद्ब्रह्मवर्चसकामोऽग्नीषोमावेव स्वेन भागधेयेनोप
धावति तावेवास्मिं +ह्म+ ब्रह्मवर्चसं धत्तो ब्रह्मवर्चस्येव भवति य
दष्टाकपालस्तेनाग्नेयो यच्छ्यामाकस्तेन सौम्यः समृध्यै सोमाय वाजिन

© Dharmartha Trust JK. Digitized by eGangotri

श्यामाकं चरुं निर्वपेद्यःक्लैव्याद्बिभीयाद्वैतान्हिवा एतस्माद्वाजिनं नम
पक्रामस्यथैषा क्लैव्याद्बिभाय सोमं मे व वाजिनं स्वेन भागधेयेनोपधा
38 वति स एवास्मिन्नेतो वाजिनं दधाति न क्लैवो भवति ब्राह्मणस्पत्यमेका
दशकपालं निर्वपेद्ग्रामकामः ॥४॥ ब्रह्मणस्पतिमेव स्वेन भागधेयेनो
पधावति स एवास्मै सजातान्प्रयच्छति ग्राम्येव भवति गणवती याज्यानु
वाक्ये भवतः सजातैरेवैनं गणवन्तं करोत्येतामेव निर्वपेद्यः कामयेत
श्री:॥ ब्रह्मन्विशं विनाशयेयमिति मारुती याज्यानुवाक्ये कुर्याद्ब्रह्मन्नेव वि
शं विनाशयति ॥५॥ तेऽसमीची ब्रह्म वर्चस्यैँ ग्रामकामः स्त्रे चत्वारि
ऽ: शाद्य ॥३॥ । अर्यम्णे चरुं निर्वपेत्सुवर्गकामो सौ वा आदित्योर्यमार्य

© Dharmartha Trust JK. Digitized by eGangotri

मणामेवस्वेनभागधेयेनोपधावति स एवैनं सुवर्गं लोकं गमयत्यर्य
म्णा चरुं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरित्यसौ वा आदित्यो
र्यमा यः खलु वै ददाति सोऽर्यमार्यमणमेव स्वेन भागधेयेनोपधावति
स एवा ॥१॥ स्मै दानकामाः प्रजाः करोति दानकामा अस्मै प्रजा भवं
त्यर्यम्णे चरुं निर्वपेद्यः कामयेत स्वस्ति जनतामियामित्यसौ वा आदि
त्योऽर्यमार्यमणमेव स्वेन भागधेयेनोपधावति स एवैनं तद्गमयति यत्र
जिगमिषतीन्द्रो वै देवानामानुजावर आसीत्स प्रजापतिमुपाधावत्तस्मा
एतमैन्द्रमानुषूकमेकादशकपालं ॥ निरवपत्तेनैवैनमग्रं देवतानां
पर्यणयद्बुध्नवती अग्रवती याज्यानुवाक्ये अकरोद्बुध्नादेवैनमग्रं पर्य

© Dharmartha Trust JK. Digitized by eGangotri

पायघाराजन्यअनुजावरस्यात्तस्मा एतमैन्द्रमानुष्टकमेकादशकपा
लं निर्वपेदिन्द्रमेव स्वेन भागधेयेनोपधावति स एवैनं मध्यं समाना
39 नां परिणयति बुध्नवती अग्रवती याज्यानुवाक्ये न वतो बुध्नादेवैनमग्रं
॥३॥ परिणयत्यानुष्टकौ न वत्यषाह्येतस्य देवताया आनुजावरः समृध्यै
यो ब्राह्मण आनुजावरः स्यात्तस्मा एतं बार्हस्पत्यमानुष्टकं चरुं निर्वपेद्बृ
हस्पतिमेव स्वेन भागधेयेनोपधावति स एवैनं मध्यं समानानां परि
श्री ४ णयति बुध्नवती अग्रवती याज्यानुवाक्ये न वतो बुध्नादेवैनमग्रं परिण ३९
यत्यानुष्टकौ न वत्यषा ह्येतस्य देवताया आनुजावरः समृध्यै ॥४॥ एवानि
र्ऋषभमेतस्य चत्वारि ॥४॥ प्रजापतेः त्रयस्त्रिंशद्दुहितर आसंताः सो
माय राज्ञे ददात्तासां रोहिणीमुपेत्ताईर्ष्यन्नितराः पुनरगच्छंता अन्वैत्ता पु

© Dharmartha Trust JK. Digitized by eGangotri

नयंयाचतताअस्मैनपुनरददात्सोऽब्रवीदृतममीष्वयथासमावच्छउपैष्याम्य
थतेपुनर्दास्यामीतिसऋतमामीत्ताअस्मैपुनरददात्तासांरोहिणीमे
वोपैत्।।।तंयक्ष्मआर्छद्राजानंयक्ष्मआरदितितद्राजयक्ष्मस्यजन्मयत्पा
पीयानभवत्तत्पापयक्ष्मस्ययज्जायाभ्योऽविंदत्तज्जायेन्यस्ययएवमेतेषां
यक्ष्माणांजन्मवेदनैनमेतेयक्ष्माविंदंतिसएताएवनमस्यन्नुपाधावत्ता
अब्रुवन्वरंवृणामहैसमावच्छएवनउपायइतितस्माएतं।।२।।आदित्यंचरुं
निरवपंतेनैवैनंपापात्स्रामादमुंचन्यःपापयक्ष्मगृहीतःस्यात्तस्माएतमा
दित्यंचरुंनिर्वपेदादित्यानेवस्वेनभागधेयेनोपधावतितएवैनंपापात्स्रा
मान्मुंचंत्यमावास्यायांनिर्वपेदमुमेवैनमाप्यायमानमन्वाप्याययतिन
वोनवोभवतिजायमानइतिपुरोनुवाक्याभवत्यायुरेवास्मिन्दधाति

© Dharmartha Trust JK. Digitized by eGangotri

ममानुसूमं ... श्री पातम०

यमादित्या अ८ श्रीमाप्यायपंतीति याज्यैवै नमेतयप्यायय ति॥ ३॥ एवोपैतम

40 स्मिंत्रयोदशात्र॥५॥ ॥प्रजापतिर्दं च भ्यो न्नाघंव्यादिता सो ब्रवी धेदि

मांल्लोकानभ्यतिसिच्यातेतन्ममासदिति तदिमां लोकानभ्यत्य [redacted] इं८ रिश्यते

राजानमिंद्र मधिराजमिंद्र८ स्वराजानं न तो वै स इमांल्लोकानस्त्रेधादुहत्ते

त्रिधातोस्त्रिधातुत्वं यं कामयेतान्नादः स्यादिति तस्मा एतं त्रिधातुं निर्वपेदिंद्रा

यराज्ञे पुरोडाशं॥ ६॥ एकादशकपालमिंद्रायाधिराजायेंद्राय स्वराज्ञेयंवा ४०

श्री।४। इंद्रो राजायमिंद्रोधिराजोसाविंद्रः स्वराडिमानेव लोकान्स्वेन भागधेयेनोप

धावति त एवास्मा अन्नं प्रयच्छंत्यन्नाद एव भवति यथा वत्सेन प्रत्तां गां दुह

एवमेवेमांल्लोकान्प्रत्तान्काममन्नं दुह उत्तानेषु कपालेष्वधिश्रयत्ययातया

© Dharmartha Trust JK. Digitized by eGangotri

यामत्याय च यः पुरोडाशो भवति च य इमे लोका एषां लोकानामाप्त्या उत्तर उत्तरो
ज्यायान्भवत्येवमिव हीमे लोकाः समृद्ध्यै सर्वेषामभिगमयन्नवद्यत्यछंबट्कारं
व्यत्यासमन्वाहानिर्दाहाय ॥२॥ पुरोडाशं च यः षड्विंशतिश्च ॥६॥ ॥७॥ देवा
सुरास्संयत्ता आसंतान्देवानसुरा अजयंते देवाः पराजिग्याना असुराणां वैश्यमु ज४
पायंस्तेभ्य इंद्रियं वीर्यमपाक्रामत्तदिंद्रो चायत्तदन्वपाक्रामत्तदवरुधं नाशक्नोत
दस्माद्ध्यर्ध्यचित्स प्रजापतिमुपाधावत्समेतया सर्वपृष्ठयायाजयत्तयैवास्मि
न्निंद्रियं वीर्यमदधाद्य इंद्रियकामः ॥१॥ वीर्यकामः स्यात्तमेतया सर्वपृष्ठया याजये ज३
देता एव देवताः स्वेन भागधेयेनोपधावति ता एवास्मिन्निंद्रियं वीर्यं दधति यदिंद्रा
य राथंतराय निर्वपति यदेवाग्नेस्तेजस्तदेवावरुंधे यदिंद्राय बार्हताय यदेवेंद्रस्य

© Dharmartha Trust JK. Digitized by eGangotri

41

तेजस्तेपदेवावनुं चेपयदिंद्रायवैनुं पा×

तेजस्तदेवावचुंधेयदिंद्रायवैन्रपाययद्वः सवितुः स्तेजस्तन्न॥२॥एवावचुंधेयदिं
द्रायवैराज्ञाययदेवधातुः स्तेजस्तेदेवावरुंधेयदिंद्रायवाक्रवाययदेवमरुतांते
जस्तदेवावरुंधेयदिंद्रायरेवतायययदेवबृहस्पतेस्तेजस्तदेवावचुंधस्तावंतिवे
तेजांसितान्येवावचुंधतन्नानष्टुकपालंघिघिश्रंयस्ययातयामवायद्वादशकपा
लःपुरोडाशः॥३॥न्नवंतिवैष्वदेवत्यायसमंतंपर्यव घतिसमंतमवाडियंवीर्यं
श्रीः॥ यजमानेदधातिव्यस्यासमन्वाहानिर्दहायश्चत्रापशोवृह्लिबेस्तः सादक्षिणा ४१
वृषत्वायतयेवपजेतानिरास्यमानरनाथेद्राअस्यदेवताअन्नमदंत्यदेव
वेवास्यमनुष्याः॥४॥ इन्द्रियकामः सवितुस्तेजस्तामुनाशोवहाविःशद्य॥६॥
यजनोवैकोपायश्चानुनिंतंजानकिंचद्रुवेन्यमुयाशस्मात्तामिद्विनिवचप

...प्रास्य

© Dharmartha Trust JK. Digitized by eGangotri

दग्नये भ्राजस्वते पुरोडाशमष्टाकपालं सौर्यं चरुमग्नये भ्राजस्वते पुरोडा
शमष्टाकपालं तयैवास्मिं चक्षुर्दधात्यश्चक्षुष्कामस्यास्मा एतामिष्टिं निर्व
पेदग्नये भ्राजस्वते पुरोडाशमष्टाकपालं सौर्यं चरुमग्नये भ्राजस्वते पुरोडा
शमष्टाकपालमग्नेर्वै चक्षुषा मनुष्या वि॥ ७॥ पश्यन्ति सूर्यस्य देवा अग्निं चै
व सूर्यं च स्वेन भागधेयेनोपधावति तावेवास्मिं चक्षुर्धत्तश्चक्षुष्मानेव भवति
यदाग्नेयौ भवतश्चक्षुषी एवास्मिं तत्प्रतिदधाति यत्सौर्यो नासिकां तेनाभितः सौ
र्यमाग्नेयौ भवतस्तस्मादभितो नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृ
ते समानी याज्यानुवाक्ये भवतः समानं हि चक्षुः समृद्ध्या उदु त्यं जातवेदस
ं सप्त त्वा हरितो रथे चित्रं देवानामुदगादनीकमिति पिण्डान्प्रयच्छति चक्षुरेवास्मै

© Dharmartha Trust JK. Digitized by eGangotri

५ता

४२

अयच्छतियद्देवतस्यतत्॥३॥विह्यच्छाविट्ऽश्चातिश्च॥८॥ ॥ध्रुवोसिध्रुवो
हं॰सजातेषुभूयासंधीरश्चेत्तावसुविध्रुवोसिध्रुवोहं॰सजातेषुभूयासमु
ग्रश्चेत्तावसुविध्रुवोहं॰सजातेषुभूयासमभिद्रश्चेत्तावसुविदामनमेस्याम
सिध्रुवो३ नस्यदेवायसजाताःकुमायासमनसःस्तानहंकामयेहृदातेमांकामयंतांहृदा
तान्मआमनसःकृधिस्वाहामनमसि॥१॥आमनस्यदेवायास्त्रियःसमनसः
स्ताअहंकामयेहृदातांमांकामयंतांहृदानामआमनसःकृधिस्वाहावैश्वदेवी
श्री:८॥ ऽसांग्रहणीनिर्वपद्ग्रामकामोवैश्वदेवावैसजाताविश्वानेवदेवान्स्वेनभागधे ८२
येनोपधावतितएवास्मैसजातान्प्रयच्छंतियाम्येवभवतिसांग्रहणीभवति
मनोग्रहणंवैसंग्रहणंमनएवसजातानां॥२॥ग्रह्णातिध्रुवोसिध्रुवोहं॰सजाते

© Dharmartha Trust JK. Digitized by eGangotri

भुभुवासमितिपरिधीन्पविदधात्याग्निपमेवेतामाधारस्तत्रोधारेतदेवसर्वं
ऽःसंज्ञातेघ्राघिनेवतियस्येवंविदुषएतेपरिधयःपरिधीयंतआमनमस्यामं
नस्यदेवाहुतितिस्त्रआहुतीर्जुहोत्यनावेंतोवेसज्ञातायमहोतायेहुलुकाया
स्त्रियःस्तानेवावरुंधतेएनमवरुद्धानुपतिष्ठंते॥७॥ स्वाहामनमसिसज्ञाता
नाऽरुंधपंचच॥८॥ ॥यत्नवमेतन्नवनीतमनवधेदसर्पत्तत्सर्पिरनव
धदघ्रियततद्घृतमनवदाधिनोप्राणोसितस्यतेदत्तांययोःप्राणोसिस्वाहेंद्र
स्यप्राणोसितस्यतेददातुयस्यप्राणोसिस्वाहामित्रावरुणयोःप्राणोसितस्य
तेदत्तांययोःप्राणोसिस्वाहाविश्वेषांदेवानांप्राणोसि॥१॥तस्यतेददतु
येषांप्राणोसिस्वाहाघृतस्यधारामम्रुतपंथामिंद्रप्रदत्तांप्रयतांमरुद्भिः।

नां २

© Dharmartha Trust JK. Digitized by eGangotri

नत्वा विष्णुः पर्यपश्यत्क्षवेडा गच्येयय तु ॥ पावमानेन त्वा स्तोमेन गायत्रस्य वर्त
न्या पाटं शार्वीर्येण देवस्त्वा सविता त्स्ट ऊत्कुञ्जी वात वञ्जी वनस्पायपट्टद्दस्थंतय
यास्त्वा स्तोमेन त्रिष्टुभा वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सविता तु ॥ २ ॥ स्टऊनु
ञ्जी वात वञ्जी नस्पायाग्नेस्त्वा मात्रया जगत्यै वर्तन्या पञ्चयणस्य वीर्येण
देवस्त्वा सविता त्स्ट ऊत्कुञ्जी वात वञ्जी वनस्पायाउ मम ग्न आयुष वर्चसं स कधि
प्रियं स्त्वेतो वरुणसोम राजन्तु । मातवास्मा अदितेशर्म यच्छ विश्वेदेवा ऊय
श्री: ॥ दृष्टिर्यथासत । अग्निरायुष्मान्स वनस्पतिभिरायुष्मानेन त्वायुषायुष्मंतं ४३
करामि सोम आयुष्मान्त्स ऊषधीभिर्यज्ञ आयुष्मान्स दक्षिणाभिर्ब्रह्मा
युष्मन्त ब्राह्मणैर्यायुष्मद्देवा आयुष्मंतस्ते मृतेन पितर आयुष्मन्तस्स्वध
© Dharmartha Trust JK. Digitized by eGangotri

यायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि॥३॥ विश्वेषांदेवानांप्राणोसित्रिष्टुभा
वर्तन्यासिशुक्रस्यवीर्येणादेवस्त्वासविताप्रसोमआयुष्मान्यंचवित्ःइतिरुद्र॥७॥ ५॥
अग्निंवाएतस्यशरीरंगच्छतिसोमंरसोवरुणएनंवरुणपाशेनगृह्णाति
सरस्वतींवागग्नाविष्णूआत्मायस्यज्योगामयतियोज्योगामयावीस्याद्यो
वाकामयतसर्वमायुर्यामितितस्माएतामिष्टिंनिर्वपदाग्नेयमष्टाकपालःं
सौम्यंचरुंवारुणंदशाकपालंसारस्वतंचरुमाग्नावैष्णवमेकादशाकपा
लमग्नेरेवास्यशरीरंनिष्क्रीणातिसोमाद्रसं॥ ॥वारुणेनैवनंवरुणपा
शान्मुंचतिसारस्वतेनवाचंदधात्यग्निःसर्वादेवताविष्णुर्यज्ञोदेवताभिरेवै
नंयज्ञेनचभिषज्यत्युतयदितासुर्भवतिजीवत्येवयन्नवमेगन्नवनीतमन्व
वदित्याज्यमवहतेतद्रूपमेवास्यैतन्महिमानंव्याचष्टेऽश्विनोःप्राणासीत्यादा

© Dharmartha Trust JK. Digitized by eGangotri

५५

ग्निर्वैदेवानां॥२॥ त्रिषडानाभ्यामेवास्मिन्नेषडंकेशांतीडुस्यप्राणासी
त्याहरूडियमेवास्मिंन्नेतेनदधातिमित्रावरुणयोःप्राणापाणासीत्याहरूप्राणा
पानावेवास्मिंन्नेतेनदधातिविश्वेषांदेवानांप्राणोसीत्याहरूवीर्यमेवास्मि
घृ० ४ न्नेतेनदधातितस्यधारामनुमन्नस्यपंथामित्याहरूयथायजुरेवैतस्याभाने
नत्वास्तोमनति॥३॥ आहरूप्राणमेवास्मिन्नेनदधेनधातिहृदहदूर्थंन्नरयोस्त्वा
स्तोमनेत्याहौजयवास्मिंन्नेतेनदधातिय गेरसामाभात्रयत्याहरूआत्मानमेवास्मिं
श्री०। न्नेतेनदधास्थीविडःपर्याद्कुर्योवंतरएवहविडःस्तरनंनिषद्यंतिब्रह्मणाहस्त ८८
मन्वारभ्यपर्योकुर्वेकधैवयजमानआयुर्दधातियद्देवनस्पतन्हविषपयाक्॥४॥
घृतंनिष्पिबत्यायुर्वैघृतममृतंहिरण्यममृतादेवायुर्निष्पिबतिशतमानं

© Dharmartha Trust JK. Digitized by eGangotri

न्वतिश्शतायुः पुरुषः शतेंद्रिय आयुष्येवेंद्रिये प्रतितिष्ठत्यथो खलु यावतीः
समा एष्यन्मन्येत तावन्मानं स्यात्समृध्या इमम् अग्न आयुषे वर्चसे कृधीत्या
हायुरेवास्मिन्वर्चो दधाति विश्वे देवा यद्दाष्ठिर्यथास दित्या रुद्र यद्दाष्ठि
वेनं क यास्याग्न यायुष्मानिति हस्तं गृह्णा॰ ॰ते देवा आयुष्मंतस्त एवा
स्मिन्नायुर्दधति सर्वमायुरेति ॥५॥ रसं देवानाट· सोमेनति हिरण्याद
सदिति हृगाविश्वातिष्ठ ॥११॥ प्रजापति॰ वरुणायाश्वमनयत्स स्वां देवता
मार्छत्स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत्तं निरवपत्ततो वै स व
रुणपाशादमुच्यत वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान् प्र
तिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेद्वरुणमेव स्वेन भागधेये

© Dharmartha Trust JK. Digitized by eGangotri

नोपधावति स एवैनं वरुणपाशान्मुंचति ॥१॥ चतुष्कपालो भवति चतु
45 ष्पाद्ध्यश्वः सन्थ्यारेकमतिरिक्तं निर्वपेद्धमेव प्रतियाहि ह्रीन्भवति यं वाध्याति
तस्मादेव वरुणपाशान्मुञ्चत्यनेन यमपरं प्रतिग्राही स्यात्सौर्यमेककपा
लमनु निर्वपेदमुमेवादित्यमुत्तारं कुरुतेपोवभृथमवैत्यप्सु वै वरुणः
साक्षादेव वरुणमवयजतेऽपोनप्त्रीयं चरुं पुनरेत्य निर्वपेदप्सुयो
निर्वा अश्वः स्वामेवैनं योनिं गमयति स एनं शान्त उपतिष्ठते ॥२॥ मुंचति
श्री ३१ चरुं सप्तदशाच ॥१२॥ ॥ यो वामिंद्रावरुणायतव्यां स्रामस्तयेममं ४५
हसो मुंचतं यो वामिंद्रावरुणा सहस्या यज्ञस्यानेजस्यानंस्तयेममं
हसो मुंचतं यो वामिंद्रावरुणावग्नौ स्रामस्तं वामेतेनाव यजे यो वामिंद्रा

© Dharmartha Trust JK. Digitized by eGangotri

वरुणाद्विपात्सुपशुषुचतुष्पात्सुगोष्ठेगृहेष्वप्स्वोषधीषुवनस्पतिषुस्वा
मस्त्वावामनेनावयजइंद्रोवाएतस्या।।इंद्रियेणापक्रामतिवरुणएनं
वरुणपाशेनगृह्णातियःपाप्मनागृहीतोभवतियःपाप्मनागृहीतस्या
तस्माएतामैंद्रावरुणींपयस्यांनिर्वपेदिंद्रएवास्मिन्निंद्रियंदधाति
वरुणएनंवरुणपाशान्मुंचतिपयस्याभवतिपयोहिवाएतस्मादप
क्रामत्यथैषपाप्मनागृहीतोयत्पयस्याभवतिपयएवास्मिंस्तयादधाति
पयस्यायां।।२।।पुरोडाशमवदधात्यात्मंन्वंतमेवैनंकरोत्यथोआय
तनवंतमेवचतुर्धाव्यूहतिदिक्ष्वेवप्रतितिष्ठतिपुनःसमूहतिदिग्भ्यएवा
स्मैठेषडांकरोतिसमूह्यावद्यतियथाविदुर्निष्ठंततितादृगेवतद्योवामिंद्रा
वरुणाबमैनोस्वामस्तंवामेतेनावयजइत्याहद्वैरेष्याएवैनंपातियोवामिंद्रा
© Dharmartha Trust JK. Digitized by eGangotri

वरुणाद्दिषाऽस्नुपश्चुश्रुस्तामसंयामेन तेनाव यज इत्यौ हैतावती वो अप औ

षधयो वनस्पतयः अजाः पशावन्नुपजीवनीयास्तौ रवास्मै वरुणपाशान्मु

46 ञ्चति ॥३॥ एतस्य पयस्यायां पाति पृश्निः इति ॥१३॥ ॥स प्रत्न

वंनि काव्येद्रंवो विश्वतनस्य योद्गं नवः । तन्न साम विश्वेतानश्वारा उन्नचा

यतः । नारिष्ये तावतः सखा । याते धामानि दिवि या पृथिव्यां या पर्वतेष्वो ष

श्रीः धीष्वप्सु । तेभिर्नौ विश्वैः सुमना अहेडन्नु याजन्नु सोम प्रति हव्या गृ ८५

भाय । अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः । सुर्वा ॥

एतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तं । युवं सिंधूंरभिशस्ते

रवद्यादग्नीषोमावमुंचतं गृभीतान् । अग्नीषोमाविमं सु मे शृणुतं वृ

© Dharmartha Trust JK. Digitized by eGangotri

षणा हवं। प्रतिस्कूका निहृयेतं कवतं दाशुषेमयः।। आन्यंदिवोमातरिश्वा
जभारामथ्नादन्यंपरिश्येनोअद्रेः। अग्नीषोमाब्रह्मणा वावृधानोरुं
यज्ञायचक्रथुरुलोकं। अग्नीषोमाहविषः प्रस्थितस्यवीतं।।२।। हर्यतं वृषणा
जुषेथां। सुशर्माणास्ववसाहिभूतमथाधत्तं यजमानाय शं योः।। आप्याय
स्वसंते।। गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनश्शृण्वंन्नूतिभिः सीदसादनं। सइज्जनेन
सविशासजन्मनासपुत्रैर्वाजं भरते धनानृभिः। देवानां यः पितरमाविवास
ति।।३।। श्रद्धामनाहविषाब्रह्मणस्पतिं। स सुष्टुभा स ऋक्वता गणेन वलंरु
रोजफलिगंरवेण। बृहस्पतिरुस्रियाहव्यसूदः कनिक्रदद्वावशतीरुदाजत्।

© Dharmartha Trust JK. Digitized by eGangotri

57

मरुतो यद्ववादिवो यावद्याम ॥ अयमायाति वृषभस्तुविष्मा दाता वसूनां पुरुहू
तो अर्हन् । सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु ॥ यत्ते यम
न्वद्देवो देवयाना पंथानः ॥ ४ ॥ याजं दिव आचरंति तेभिर्नो देव मदिशर्म यच्छ
शंनरेषिद्विपदे शं चतुष्पदे । बुध्नादग्रमंगिरोभिर्गृणानो विपर्वतस्य दृंहि
तान्यरन् । रुजो रोधांसि कृत्रिमाण्येषां सोमस्य तामद इंद्रश्चकार । बुध्ना
दग्रेण विमिमायमानैर्वज्रेण खान्यतृणन्नदीनां । वृथासृजत् पथिभिर्दीर्घया ६
स्तो॰१॥ थैः सोमस्य तामद इंद्रश्चकार ॥ ५ ॥ प्रयोजज्ञे विद्वाँ अस्य बंधुं विश्वानि देवो ज
निमा विवक्ति । ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचादुच्चा स्वधयाभित्रतस्थौ ॥ म
हान्मही अस्तभायद्विजातो द्यां सद्म पार्थिवं च रजः ॥ सबुध्नादाष्ट जनुषाभ्य

© Dharmartha Trust JK. Digitized by eGangotri

यंबृहस्पतिर्देवतानायस्पसंप्राह् ॥ वृष्णाय्यो अग्नमभ्यप्योऽसाद्बृहस्पतिमा
विवासंतिदेवाः ॥ जिनहूलंविष्णु ॥ दृद्दयीति कानिकदस्तुवनपाडिगाय्या ॥ ६ ॥
सुवंवीतमाविवासंतिपंथानादीर्घयाय सोमस्यतामदं इन्द्रकायदेवा
नवचा ॥ ७ ॥ ॥ आदित्यायादेवायैप्तत्यादेवावेसयमसतायैमा
प्रजापतेस्यययाश्चिरेः मात्रजापतिर्देवेभ्यांन्नादं देवासुयास्तान्वजेनाक्रव
सियन्तवमेदग्निवे प्रजापतिर्वरुणायपाया ॥ मिंद्रावरुणासप्रवज्रंतुदे ॥
आदित्येभ्यः चरुं ... नकामायवावरुंधेग्निंवैसप्रत्तवषट् पंचाशत् ॥
॥ हरिःॐ ॥ ॐ ॥ देवामनुष्याः पितरस्तेन्यतआसन्नसुरा रक्षांसिपिशाचा
स्तेन्यतस्तेषांदेवानामुतयदल्पंलोहितमकुर्वन्त द्रक्षांसिरात्रीभिरसुभ्नंना

T.S.
2,4
complete

© Dharmartha Trust JK. Digitized by eGangotri

48

स्सृष्टान्मृतानग्निर्व्याच्छत्तद्देवा अविदुर्यो वै नायं म्रियते रक्षांसि वा इमं घ्नं
न्तीति ते रक्षांस्युपामंत्रयंत तान्यब्रुवन्वरं वृणामहै यत् ॥१॥ असुरांज
याम तन्नः सहासदिति ततो वै देवा असुरानजयंतसुरांजित्वा रक्षांस्य
पानुदंत तानि रक्षांस्यनृतमकर्तेति समंतं देवान्पर्यविशंस्ते देवा अग्ना
वनाथंत तेग्नये प्रवते पुरोडाशमष्टाकपालं निरवपन्नग्नये विबाधवते
ग्नये प्रतीकवते यदग्नये प्रवते निरवपन्यान्येव पुरस्ताद्रक्षांसि ॥२॥ आ ७९
श्री:७१ संतानि तेन प्राणुदंत यदग्नये विबाधवते यान्येवाभितो रक्षांस्यासंता
नि तेन व्यबाधंत यदग्नये प्रतीकवते यान्येव पश्चाद्रक्षांस्यासंतानि तेना
पानुदंत ततो देवा अभवन्परासुरा यो भ्रातृव्यवान्स्यात्स स्पर्धमानस्तयथा

© Dharmartha Trust JK. Digitized by eGangotri

यजेताग्नये प्रवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवते ॥ अग्नये
प्रतीकवते यदग्नये प्रवते निर्वपति य एवास्माच्छ्रेयान्भ्रातृव्यस्तेन प्रणुदते
यदग्नये विबाधवते य एवैनं नसदृक्तेनैनं विबाधते यदग्नये प्रतीकवते य ए
वास्मात्पापीयांस्तेनैनापनुदते प्रश्रेयांसं भ्रातृव्यं नुदते नि सदृक्षं का
ति नैनं पापीयानाप्नोति य एवं विद्वानेतया यजते ॥४॥ दूणाम हर्यं यापु
रोडाशमष्टाकपालं निर्वपेदग्नये विबाधवत एवं चत्वारि च ॥५॥ देवासुराः संयत्ता
आसंस्ते देवा अब्रुवन्या नो वीर्यावत्तमः स्तनूस्तामनु समारभामहा इति त इन्द्रमब्रु
वंस्त्वं वै नो वीर्यावत्त मोऽसि त्वामनु समारभामहा इति त इन्द्रमब्रुवंस्त्वं वै नो वीर्यावत्त
मोऽसि त्वामनु समारभामहा इति सोऽब्रवीत्तिस्रो म इमाः स्तनुवो वीर्यावतीस्ताः

© Dharmartha Trust JK. Digitized by eGangotri

प्राणीनाथ्यासु यानान्नि न विषयेति तावेन्द्र हीत्यब्रुवन्नि पमं ह्रासु गीर्यं विमृध
49 याभिं ड्रियावती ॥ ॥ इत्यब्रवीत्तइंड्रायाटं हो मुच पुरोडाशमेकादशकपा
लं निर्वपान्निंड्रा पवमृधायेंड्राय इंड्रियावते यदी ड्रायाटःहो मुचानिर्व
प४ पंनटःहस्र वतनाऊंच्यंतोदिंड्रायवेमृधाय मृध एवतेनापाघ्नतयदिंड्रा
यंड्रियवतेइंड्रियमेवतेनात्मन्नदधत्ताचरास्त्रिरः शाक्तकपालं पुरोडाशंनि
पवपंचयास्त्रिरःशाहूदेवतास्ताइंड्रआत्मन्ननुसमारंयन्नेफ्तरा ॥२॥ तांवा
श्री॰॥ वदेवा विजितिमुत्तमामसुरैर्व्यजयन्त ॥ यांरव्यवांह्स्यास्स स्पर्द्धमानएत ४॰
यहसा यजतैंड्रायाटःहामुचपुरोडाशमेकादशकपालं निर्वपेदिंड्रायव
मृधायेंड्रायेंड्रियावतेटःसावारबाहंलीतायस्मा ध्रुयान्नात्त्वायेपेयदिंड्रा

© Dharmartha Trust JK. Digitized by eGangotri

पाट: देवेभ्यो निर्वपत्यै हस्तस्वतेनमुच्यतेम्भावारषोत्रिषंण्णोय
स्मात्सुरावतः श्रयानुतारु अभ्वातव्याय यदिंद्राय वेन्धायस्तेघ
स्वतेन वताय यदिंद्रायेंद्रियावतइंद्रियमेवतेनात्मंधत्ते त्रयास्विऽं द्रा
कः निर्वपा डारोनिर्वपति त्रयास्विरः द्रहैदेवतास्तोआत्मंन्तु सम
स्मै हस्तस्व सावारषाविद्धिनितोमच्छियरवं विद्वानेतयच्यायजनेत
इंद्रस्वतइंद्र चिद्विशितिभ्रातव्यंणा विजयते ॥४॥ इंद्रियावतीसमानेने कांन
वपंः ज्ञा ॥ ६॥२॥ देवासुराः संयत्ता आसंतेषांगायत्र्योजोबलमिं
द्रियंवीर्यंप्रजांपशून्संगृह्यादायापक्रम्यातिष्ठत्तेमन्यंतयतरान्वाइ
यमुपावर्त्स्यतितइदंभविष्यंतीति तांव्यंह्वयंतविश्वकर्मं निति देवादाभी

[illegible]सानान्यतनया ऽश्वनोपावर्त्तततेनदेवारतघ्नऊयपश्यंनाऽजोसि
बलमसि॥१॥भ्राजोसिदेवानांधामनामासिविश्वमसिविश्वा
[illegible]सिसर्वायुरभिभूरितिवावदेवा असुराणामोजोबलमिंद्रि
[illegible]नटः [illegible] पश्नन्हंजत [illegible] यज्ञायच्यपक्रम्यातिष्ठत्तस्मादेतांगायत्री॥तो
[illegible]डियंतेऽ [illegible] गायत्रीसंवत्सरोवतदपक्रम्यातिष्ठद्यदेतयादेवा
[illegible]यपंत्रयीस [illegible] मिंद्रियंवीर्यं॥२॥प्रजांपश्नन्हंजततस्मादेताः
श्री०॥ सं [illegible] विजि [illegible] कु [illegible] त्वयवांस्यात्सस्यहमानरतयष्ठायजेताग्न ५०
यस [illegible] तेवं [illegible] मष्टाकपालंनिर्वपेच्छतमासेनमेतेनयज्ञ
घाति [illegible] मिंद्रियंवीर्यंप्रजांपशु [illegible] त्वयस्यहंजू [illegible] वसा

© Dharmartha Trust JK. Digitized by eGangotri

स्मनापया [illegible] न्नवेत्यवति ॥ ३ ॥ बलमस्यतपादेवाअस्मुयाणामोऽ
बच्छमीं [illegible] निधं [illegible] चापिठ इाज्ञ ॥ ३ ॥ प्रजापतिः प्रजाअसृजततोऽ
स्मात् [illegible] पद [illegible] यच्चावसंततागमुडदतिष्ठत्ता बृहस्पतिश्चान्व
वैत [illegible] त्वंपुन [illegible] त नयाद्या प्रतिष्ठां न्यथाद्या प्रजाउपावस्यंती
तित [illegible] यतेभ्य [illegible] जापतिं प्रजाउपावर्त्तत यः प्रजाकामस्यात्तस्मा एतं
[illegible] निर्वपेत्प्रजापतिं ॥ १ ॥ एव स्वेन भागधेयेनोपधाव
[illegible] मामे [illegible] प्रजां प्रजनयति प्रजापतिः पशूनसृजत तस्मात्सृष्टाः परां
[illegible] यच्चावसंततापमुडदतिष्ठत्तान्पूषा चान्ववैताः सोऽब्रवीद
[illegible] प्रतिष्ठाथ वा पशवउपावस्यंतीति मां प्रतिष्ठेति सोमाब्रवीन्म
[illegible] मा [illegible] कृष पच्यामि स्मुभोवां प्रतिष्ठानीत्यब्रवीत्तोऽप्रातिष्ठत्ततावै प्र

© Dharmartha Trust JK. Digitized by eGangotri

ऽवरुपावर्त्तन्तस्मः पशुकामस्यावस्मारन्तं सोमापौष्णं च-
रुं निर्वपेत्सोमापूषणावेव स्वेन भागधेयेनोपधावति तावेवास्मै प-
शून्प्रजनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै
रेतो दधाति पूषा पशून्प्रजनयति ॥ ३ ॥ वैपप्रजापतिं वेदद्धातृपूषाणीपि
च ॥ ४ ॥ अग्ने गोभिर्न आ गहीन्दो पुष्ट्या जुषस्व नः । इन्द्रो धर्त्ता गृहेषु नः ।
सविता यः सहस्रियः स नो गृहेषु रारणत् ॥ आ पूषा एत्वा वसु । धाता दद-
श्री:० ॥ (तु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन वावनत् । त्वष्टा यो वृषभो वृ- ५१
षा स नो गृहेषु रारणत् । सहस्रेणायुतेन च । येन देवा अमृतं । १ । दीर्घं श्र-
वो दिव्यैरयन्त । रायस्पोषममस्मा ॥ ध्वं गवां कुल्मिं जीवस आयुवस्चा । अ

© Dharmartha Trust JK. Digitized by eGangotri

उद्गोदिव्यस्यनोदही शानो विस्रजाहीतं । यदेवादिंविभागायं तपिस्त
भागायपृथिविभागाः । तदुमंयज्ञमवंतुनइदंक्सत्रमाविशंकुतइदंक्स
मक्लुविविशंतु ॥ २ ॥ यंनिरवाविश्मातिष्ठ ॥ ७ ॥ ८ मारुतमसिमरुतामो
जङ्तिष्ठ ख्लंवासःकल्पत्संपविधनरतदृष्टस्येरपटःसचूपए वर्षत्वाप
जन्यंवर्षयतिरभयतभरुतःस्यनमापिनामितिपर्याद्वातंप्रतिमीवाति
पुरावातमवजनयतिवर्षस्यावरुध्यैवातनामानिजुहोतिवायुर्वैवृष्ट्या
ईशेवैवायुमवस्वेनभागधेयेनोपधावतिसएवास्मैपर्जन्यंवर्ष —
श्री॰ ॥ ७१ ॥ ष्टा ॥ १ ॥ जुहोतिचतस्रोवेदिशश्चतस्रोवांतरदिशोदिग्भ्यएव ॰ वर्षंप्राच्या
प्रच्यावयतिकृष्णाजिनेसंयौतिहविर्वाकृष्णंतदेवाद्गिसंयौत्यधः ॥ १ ॥ दीर्घ ॰
नामघमानानातः शीर्षोणिपरापतंतेस्वर्डैराजन्नवंतेषांरसोघो

रीरुदती:सुफेना:।मित्रभृत:क्षत्रभृत:सुराष्ट्रा इह मावत।हस्तो अश्व
संदानमसि वृष्ण्यं वापनह्यामि॥२॥ प्राणे राष्ट्रहृचि॥ वारिदं व ववास्मप
52 देवावसव्या अग्ने सोमसूर्या देवा:शर्मण्य मित्रावरुणार्यमन् वास्मे
पीतया पांनपादा उरुमन्नुं त नद्वादनोदधिं जिंतदिव:पर्जन्या दंतरिक्ष:
त्पृथिव्यास्ततो नो वृष्ण्यावत।दिवाचित्तम:कृण्वंति पर्जन्येनोदवाहेन।पृ
थिवीं यद्व्युंदंति।आ यं नर:सुदानवो ददाशुषे दिव:कोशमचुच्यवु:।वि
पर्जन्या:सृजंति रोदसी अनु धन्वना यंति॥९॥ वृष्टय:।उदीरयथा मरुत: 42
समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिण:।न वो दस्रा उप दस्यंति धेनव:
शुभं यातामनु रथा अवृत्सत।सृजा वृष्टिं दिव आद्भि:समुद्रं पृण।अब्जा
असि प्रथमजा बलमसि समुद्रियं।उन्नंभय पृथिवीं भिंधी दं दिव्यं नभ:॥

© Dharmartha Trust JK. Digitized by eGangotri

वृष्टिमिच्छन्नियदिवर्षेन्नावत्येवहोतव्यंयदिनवर्षेच्छ्वोभूतेहविर्निर्वपेदहोरात्रे
वैमित्रावरुणायहोरात्राभ्यांखलुवैपर्जन्योवर्षतिनक्तंवाहिदिवावावर्षति
मित्रावरुणावेवस्वेनभागधेयेनोपधावतितावेवास्मै॥१॥अहोरात्राभ्यां
पर्जन्यंवर्षयतोग्नयेधामच्छदेपुरोडाशमष्टाकपालंनिर्वपेन्मारुतꣳसप्त
कपालꣳसौर्यमेककपालमग्निर्वाइतोवृष्टिमुदीरयतिमरुतःसृष्टांनयं
तियदाखलुवाअसावादित्योन्यङ्रश्मिभिःपर्यावर्ततेथवर्षतिधामच्छदिव
श्रीः खलुवैभूत्वावर्षत्येतावैदेवतावृष्ट्याईशतेताएवस्वेनभागधेयेनोपधा
वतिताः॥२॥एवास्मैपर्जन्यंवर्षयन्त्युतावर्षिष्यन्वर्षत्येवसृष्टांवृष्टिंदि
व्याश्चाद्भिःसमुद्रंपृणेत्याहेमाश्चैवामूश्चापःसमर्धयत्यथोआग्नेयवाम

© Dharmartha Trust JK. Digitized by eGangotri

पतत्राणिकरीराण्यन्नवंसौम्यानिवैकरीराणिसौम्याखलुवाआहुतिर्दि
वोवृष्टिंच्यावयतियत्करीराणिभवंति॥२॥सौम्ययैवाहुत्यादिवोवृष्टि
मवरुंधेमधुषासंयौत्यपांवाएषओषधीनांरसोयन्मधुअद्भ्यएवौष
धीभ्योवर्षंच्यावयत्यथोअद्भ्यएवौषधीभ्योवृष्टिंनिनयतिमांदावाशाइतिसंयौ
तिनामधेयैर्वैनाअच्छैत्यथायथाब्रूयादसावेह्येवमेवैनानामधे
यैरा॥३॥च्यावयतिवृष्णोअश्वस्यसंदानमसिवृष्ट्यैत्वोपनह्यामीत्या ५३
हवृषावाअश्वोवृषापर्जन्यःकृष्णइवखलुवैभूत्वावर्षतिरूपेणैवैनंसम
र्धयतिवर्षस्यावरुद्ध्यै॥४॥अष्टौभवंतिनामधेयैरेकान्नत्रिंशद्राज्ञा॥५॥ ॥६॥
